# Vyasa Ashtottarashatanama Stotram

# વ્યાસાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Vyasa Ashtottarashatanama Stotram

File name : vyAsAShTottarashatanAmastotram.itx

Category : deities_misc, gurudev, aShTottarashatanAma

Location : doc_deities_misc

Transliterated by : Aruna Narayanan

Proofread by : Aruna Narayanan

Description/comments : See corresponding nAmAvalI

Latest update : April 12, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2024

*sanskritdocuments.org*

# વ્યાસાષ્ટોત્તરશતનામસ્તોત્રમ્

॥ ધ્યાનમ્ ॥

અભ્ર-શ્યામઃ પિઙ્ગ-જટા-બદ્ધ-કલાપઃ
પ્રાંશુર્દણ્ડીકૃષ્ણમૃગ-ત્વક્-પરિધાનઃ ।
સર્વાન્ લોકાન્ પાવયમાનઃ કવિ-મુખ્યઃ
પારાશર્યઃ પર્વ-સુરૂપં વિવૃણોતુ ॥ ૧॥

વ્યાસં વસિષ્ઠ-નપ્તારં શક્તેઃ પૌત્રમકલ્મષમ્ ।
પરાશરાત્મજં વન્દે શુકતાતં તપોનિધિમ્ ॥ ૨॥

કૃષ્ણ-દ્વૈપાયનં વ્યાસં સર્વ-ભૂત-હિતેરતમ્ ।
વેદાબ્જ-ભાસ્કરં વન્દે શમાદિ-નિલયં મુનિમ્ ॥ ૩॥

અથ સ્તોત્રમ્ ।
ૐ નારાયણકુલોદ્ભૂતો નારાયણપરો વરઃ ।
નારાયણાવતારશ્ચ નારાયણવશંવદઃ ॥ ૧॥

સ્વયમ્ભૂવંશસમ્ભૂતો વસિષ્ઠકુલદીપકઃ ।
શક્તિપૌત્રઃ પાપહન્તા પરાશરસુતોઽમલઃ ॥ ૨॥

દ્વૈપાયનો માતૃભક્તઃ શિષ્ટઃ સત્યવતીસુતઃ ।
સ્વયમુદ્ભૂતવેદશ્ચ ચતુર્વેદવિભાગકૃત્ ॥ ૩॥

મહાભારતકર્તા ચ બ્રહ્મસૂત્રપ્રજાપતિઃ ।
અષ્ટાદશપુરાણાનાં કર્તા શ્યામઃ પ્રશિષ્યકઃ ॥ ૪॥

શુકતાતઃ પિઙ્ગજટઃ પ્રાંશુર્દણ્ડીમૃગાજિનઃ ।
વશ્યવાગ્ જ્ઞાનદાતા ચ શઙ્કરાયુઃપ્રદઃ શુચિઃ ॥ ૫॥

માતૃવાક્યકરો ધર્મી કર્મી તત્ત્વાર્થ દર્શકઃ ।
સઞ્જયજ્ઞાનદાતા ચ પ્રતિસ્મૃત્યુપદેશકઃ ॥ ૬॥

સર્વધર્મોપદેષ્ટા ચ મૃતદર્શનપણ્ડિતઃ ।
વિચક્ષણઃ પ્રહૃષ્ટાત્મા પર્વપૂજ્યઃ પ્રભુર્મુનિઃ ॥ ૭॥

વીરો વિશ્રુતવિજ્ઞાનઃ પ્રાજ્ઞશ્ચાજ્ઞાનનાશનઃ ।
બ્રાહ્મકૃત્ પાદ્મકૃદ્ ધીરો વિષ્ણુકૃચ્છૈવકૃત્ તથા ॥ ૮॥

શ્રીભાગવતકર્તા ચ ભવિષ્યરચનાદરઃ ।
નારદાખ્યસ્ય કર્તા ચ માર્કણ્ડેયકરોઽગ્નિકૃત્ ॥ ૯॥

બ્રહ્મવૈવર્તકર્તા ચ લિઙ્ગકૃચ્ચ વરાહકૃત્ ।
સ્કાન્દકર્તા વામનકૃત્ કૂર્મકર્તા ચ મત્સ્યકૃત્ ॥ ૧૦॥

ગરુડાખ્યસ્ય કર્તા ચ બ્રહ્માણ્ડાખ્યપુરાણકૃત્ ।
ઉપપુરાણાનાં કર્તા પુરાણઃ પુરુષોત્તમઃ ॥ ૧૧॥

કાશિવાસી બ્રહ્મનિધિર્ગીતાદાતા મહામતિઃ ।
સર્વજ્ઞઃ સર્વસિદ્ધિશ્ચ સર્વશાસ્ત્રપ્રવર્તકઃ ॥ ૧૨॥

સર્વાશ્રયઃ સર્વહિતઃ સર્વઃ સર્વગુણાશ્રયઃ ।
વિશુદ્ધઃ શુદ્ધિકૃદ્ દક્ષો વિષ્ણુભક્તઃ શિવાર્ચકઃ ॥ ૧૩॥

દેવીભક્તઃ સ્કન્દરુચિર્ગણેશાદૃચ્ચ યોગવિત્ ।
પૈલાચાર્ય રુચઃ કર્તા શાકલ્યાર્યશ્ચ યાજુષઃ ॥ ૧૪॥

જૈમિન્યાર્યઃ સામકર્તા સુમન્ત્વાર્યોઽપ્યથર્વકૃત્ ।
રોમહર્ષણસૂતાર્યો લોકાચાર્યો મહામુનિઃ ॥ ૧૫॥

વ્યાસકાશીરતિર્વિશ્વપૂજ્યો વિશ્વેશપૂજકઃ ।
શાન્તઃ શાન્તાકૃતિઃ શાન્તચિત્તઃ શાન્તિપ્રદસ્તથા ॥ ૧૬॥

॥ ઇતિ વ્યાસાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Vyasa Ashtottarashatanama Stotram*

pdf was typeset on April 12, 2024

Please send corrections to *sanskrit@cheerful.com*